# SANSKRIT

# संस्कृत - विभागम्

## प्रार्थना

त्वमेव माता च पिता त्वमेव ,
त्वमेवबन्धुश्च सखा त्वमेव ||
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव देव ||
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः |
गुरुर्साक्षात् परं ब्रह्मा तस्मै श्री गुरवे नमः ||
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः |
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ||

— VARSHA, 9C

# मम देशः महान्

## अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते | जननी जन्मभूमिश्च स्वर्गादपि गरीयसि ||

सत्यम् एवम् अस्ति यत् मातृभूमिः स्वर्गात् अपि प्रियतरा भवति | माम् अपि भारतम् अति प्रियम् | भारतम् अति प्राचीनं विशालं च अस्ति | पुरा अस्य नाम आर्यावर्तः आसीत् | गिरिराजः हिमालयः उत्तरदिशायां प्रहरी इव इमं रक्षति | दक्षिणदिशि विशालः जलधिः ' हिन्दमहासागरः ' अस्ति | भारते अनेकाः नद्याः प्रवहन्ति | यस्यां पवित्रा गंगा, यमुना, कृष्णा, गोदावरी , विपाशा, वर्मदा , तुङ्गभद्रा आदयः नद्यः भारतस्य क्षेत्राणि सिञ्चान्ति | अस्मिन् देशे एव षड् ऋतवः भवन्ति |

मम भारते एव अनेक -सम्प्रदायानां जनाः स्नेहेन मिलित्वा वसन्ति | सर्वत्र विविधता अस्ति | यथा - विविधाः भाषाः, विविधाः वेशभूषाः, विविधाः उपासनापद्धतयः, विविधानि पर्वाणि , विविधं भोजनं च | तथापि अत्र अनेकतायाम् एकतायाः अनुपमा धारा प्रवहति | सर्वासु भाषासु संस्कृतभाषा प्राचिनतमा भाषा अस्ति | अस्यां भाषायां लिखिताः वेदाः, उपनिषदः, रामायणम्, महाभारतम् इत्यादयः ग्रन्थाः भारतस्य गुरवाः सन्ति | आत्मवत् सर्वभूतेषु, आहिंसा परमोधर्मः वसुधैव कुटुम्बकम्,

सर्वे भवन्तु सुखिनः सर्वजनहिताय सर्वजनसुखाय एतानि अस्माकं देशस्य आदर्शवाक्यानि सन्ति | एतेषु वाक्येषु एव भारतीया संस्कृतिः निहिता अस्ति |

परम् एतत् अस्माकं दौर्भाग्यम् अस्ति यत् अद्य देशे केचन जनाः निजस्वार्थाय देशस्य उन्नतिमार्गे व्यवधानं जनयन्ति | केचन आतंकवादिनः अकारणैः निर्दोषान् जनान् हत्वा आतंकं प्रसारयन्ति | तेभ्यः देशं रक्षितुं वयम् एकतायाः सूत्रं बद्ध्वा आतंकस्य अस्याः समस्यायाः निवारणाय प्रयत्नं कुर्याम् |

— PARVATHY, 7C

# संस्कृत प्रहेलिका

मे घ श्‌ या मो ऽ स्मि नो कृष्णो ,
म हा का यो न प र्व तः ।
ब लि ष्ठो ऽस्मि न भी मो ऽस्मि,
को ऽ स्‌ म्‌ य हं ना सि का क रः ।।
कृष्ण न हीं पर हूं मैं का ला ,
प र्व त जै सा श री र वा ला । भी म
न ही प र हूं ब ल वा न, ल म्बे मे रे
कान व ना क । चा ल - च ल न में
म सू त ज वा न , बू झै मु झ की
बु दि्धमान ।

— ADHYA SHETTY, *6D*

# आत्मस्य विचार्ण पदं

अस्माकं आत्मा अस्माकं जीवनम् अस्ति ।
अस्माकं आत्मा अस्माकं शरीरे अस्ति ।
यदि आत्मा अस्माकं शरीरे अस्ति ।
तर्हिं आत्मा अपि स्वस्थः भवतु ।
स्वास्थ्यं न केवलं शरीरं यत् खादति तस्मिन् एव भवितुमर्हति ।
परन्तु अस्माकं गुणाः अपि स्वस्थाः भवेयुः ।
जनाः अस्माकं शरीरं पश्यन्ति ।
किन्तु अस्माकं आत्मानं दृष्टुं न शक्नोमि ।
अतः अस्माभिः निश्चयं कर्तव्यं यत् आत्मा दयालु : विनयशील: च अस्ति ।
अस्माकं शरीरं यथा आत्मानं निर्देशयति तथा कार्यं करोति ।
केवलं चिन्तयतु यदि भवतः आत्मा अधर्मस्य दासि भवेतु ।।

— SAANVI SRI, *8E*

# जीवाया

जीवायाः गुरुत्वं यस्मिन् अस्ति
यस्य आचरणं गुरुकार्यं अस्ति
यस्य मार्गदर्शनं अन्तः स्थितेन हृदयरश्मिना
सद्गुरुणा भविष्यति |

येन मार्गेन गमनं रज्वां चलनं इव सावधानेन
विवेकदृष्ट्या वैराग्यभावनया शमादिषट्क सम्पदः प्रभावेणा
ममक्षत्वस्य शक्त्या कारणीयं अस्ति ||

— SOUGANDHIKA, *8E*

# || गीतायाः माहात्म्यम् ||

कर्मण्येवाधिकारस्ते मा फ़लेषु कदाचन
मा कर्मफ़ल हेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ||

अथ केन प्रेयुक्तोऽयं पापं चरति पूरुष : |
अनिच्छन्नपि वार्ष्णेय ! बलादिव नियोजितः ||

काम एष क्रोधं एष रजोगुणसमुद्भवः |
महाशनो महापाप्मा विदध्येनमिह वैरिणम् ||

सुखदु:खे समे कृत्वा लाभालाभौ जयाजयौ |
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ||

नैनं छिन्दन्ति शास्त्राणि, नैनं दहति पावकः |
न चैनं क्लेदयन्त्यापो, न शोषयति मारुतः ||

यदा यदा हि धर्मस्य ग्लानिर्भवति भारतः !
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ||

— DISHA HEDGE, *7B*

# प्राचिन काल कवय
# वाल्मीकि

**Valmiki**



Sage Valmiki composing the *Ramayana*

वाल्मीकि एकः पौराणिकः कविः आसीत् | यः ग्रन्थे एव आरोपणस्य आधारेण रामायण महाकाव्यस्य पारम्परिकः लेखकः इति प्रसिद्धः अस्ति सः आदी कविः प्रथमः कविः, प्रथममहाकाव्यस्य रामायणस्य रचयिता इति पूज्यः अस्ति । मूलतः वाल्मीकिना रचिते रामायणे २४,००० श्लोकाः सप्त कान्टोः (काण्डाः) च सन्ति ।[५] रामायणं प्रायः ४,८०,००२ शब्दैः निर्मितम् अस्ति, यत् महाभारतस्य पूर्णग्रन्थस्य चतुर्थांशं वा इलियाडस्य चतुर्गुणं वा भवति । रामायणे कोसलराज्यस्य अयोध्यानगरस्य रामस्य राजकुमारस्य कथा अस्ति यस्य पत्नी सीता लङ्कायाः राक्षसराजेन रावणेन अपहृता भवति। ८ शताब्द्याः चतुर्थशताब्द्याः [६][७] पर्यन्तं ग्रन्थस्य प्रारम्भिकपदस्य,[८] तृतीयशताब्द्याः यावत् विस्तृतपदस्य च विद्वांसः अनुमानं यद्यपि रचनायाः मूलतिथिः अज्ञाता अस्ति अनेकेषु पारम्परिकमहाकाव्येषु इव अयं प्रक्षेपणस्य,संपादनस्य च प्रक्रियां गतवान्,येन समीचीनतया तिथिनिर्धारणं असम्भवं जातम् ।

ब्रिटिश-व्यङ्ग्यकारः औब्रे मेनेन् कथयति यत् वाल्मीकिः "साहित्यिकप्रतिभारूपेण स्वीकृतः" आसीत्, अतः "भारतीय-प्रबुद्धता"-कालस्य भागत्वेन तस्य "दार्शनिकसंशयवादस्य" कारणतः [9] इति अनुमानं भवति ] . वाल्मीकिः अपि रामसमकालीनः इति उद्धृतः अस्ति । मेनेन् इत्यस्य दावानुसारं वाल्मीकिः "सर्वे इतिहासे प्रथमः लेखकः अस्ति यः स्वरचने स्वं आनयति" ।[११]

— KANYA KARTHIGEYAN, 9E



## २. कालिदास

कालिदासः शास्त्रीयसंस्कृतलेखकः आसीत् यः प्रायः प्राचीनभारतस्य महान् कविः नाटककारः च इति मन्यते । तस्य नाटकानि काव्यानि च मुख्यतया हिन्दुपुराणानां दर्शनस्य च आधारेण भवन्ति । तस्य जीविताः कृतयः त्रयः नाटकानि, द्वौ महाकाव्यौ, द्वौ लघुकाव्यौ च सन्ति । तस्य जीवनस्य विषये बहु किमपि अज्ञातं केवलं तस्य काव्य-नाटकयोः अनुमानं कर्तुं शक्यते । तस्य कृतीनां तिथिः सटीकतया ज्ञातुं न शक्यते, परन्तु तेषां लेखकाः ५ शताब्द्याः पूर्वं भवितुं शक्नुवन्ति ।

— Aaron, *9B*

## ३. भट्ट मथुरानाथ शास्त्री

भट्ट मथुरानाथ शास्त्री (संस्कृतः भट्टरनाथ शीली) (२३ मार्च १८८९ - ४ जून १९६४) राजस्थानस्य जयपुरतः प्रख्यातः भारतीयः संस्कृतविद्वान्, कविः, दार्शनिकः, व्याकरणशास्त्रज्ञः, बहुभाषी, तन्त्रविशेषज्ञः च आसीत् ।[१] सः विंशतिशतकस्य प्रमुखेषु संस्कृतलेखकेषु अन्यतमः आसीत् यः पारम्परिक-आधुनिक-विषयेषु लेखनं कृतवान् ।[२] सः संस्कृतसाहित्ये रेडियोनाटकानि, निबन्धानि, यात्रावृत्तान्तानि, लघुकथां च लिखित्वा अनेकानाम् नवीनविधानां प्रयोगस्य अग्रणीः अभवत् ।[२][३][४] सः संस्कृतभाषायां गजल-थुमरी-दाद्रा-ध्रुवपदानि इत्यादीनि अनेकानि गीतानि रचितवान् ।[२][४] सः संस्कृतकाव्ये प्राकृतस्य (ब्राजा-हिन्दी) मीटर्-उपयोगस्य अग्रणीः अभवत् ।[४][५]



भट्ट मथुरानाथशास्त्री इत्यस्य जन्म जयपुरे प्रसिद्धे देवर्षीकुटुम्बे अभवत् यस्य परम्परा चतुःशताधिकवर्षेभ्यः पूर्वं महान् संस्कृतविद्वांसः कविः च आसीत्। तस्य पितुः नाम देवर्शी द्वारकानाथ भट्टः, मातुः नाम श्रीमति जानकी देवी, अग्रजस्य नाम देवर्शी रामनाथ शास्त्री, यः स्वयं संस्कृतविद्वान्, 'शुद्ध अद्वैतवाद' (शुद्धद्वैत) इति पुष्टिमार्गसम्प्रदायस्य समर्थकः, भाष्यकारः च आसीत् । तस्य पूर्वजाः कृष्णयजुर्वेदम् अनुसृत्य गौतमगोत्रस्य तैलङ्गब्राह्मणाः आसन् । देवर्षिपरिवारस्य आरम्भः बविजी दीक्षितेन अभवत्, यः वर्तमानकालस्य आन्ध्रप्रदेशस्य देवरकोण्डात् अथवा देवलपल्लीग्रामात् (तेषां कुलनामदेवर्शी इत्यस्य उत्पत्तिः) मुगलशासनकाले वाराणसीं प्रति प्रवासं कृतवान् । बविजी दीक्षितस्य वंशजाः पश्चात् वाराणसीतः प्रयागं, ततः रीवा (यत्र तेभ्यः दिवृखिया इति ग्रामस्य जागीरं दत्तम्) ततः बुण्डीनगरं प्रव्रजितवन्तः । बुण्डीतः महाराजा सवाई जयसिंहः संस्कृतस्य ब्रज-भाषायाः च प्रसिद्धं कविं कविकालनिधिदेवर्षिश्रीकृष्णभट्टं स्वजयपुर-न्यायालये आनयन् "कविकालानिधि" (काव्यविशेषज्ञतानिधिः) इति उपाधिं प्रदत्तवान् । देवर्षिपरिवारे श्रीकृष्णभट्टस्य वंशजाः द्वारकानाथभट्टः, जगदीशभट्टः, वासुदेवभट्टः, मण्डनभट्टः च सन्ति, ये सर्वे जयपुरस्य महाराजानाम् दरबारस्य राजकविः आसन् ।[६] अस्मिन् कुटुम्बे मथुरानाथशास्त्री इत्यस्य जन्म १८८९ तमे वर्षे मार्चमासस्य २३ दिनाङ्के जयपुरनगरे अभवत् ।[६]

— Nagashree, *9B*

# सर्वेभ्यः शिक्षिकाभ्यः शिक्षिकेभ्यः च समर्पितम्

किम् अस्ति तत् पदम्
यः लभते इह सम्मानम्
किम् अस्ति तत् पदम्
यः करोति देशानाम् निर्माणम्

किम् अस्ति तत् पदम्
यम् कुर्वन्ति सर्वे प्रणामम्
किम् अस्ति तत् पदम्
यस्य छायायाः प्राप्तम् ज्ञानम्

किम् अस्ति तत् पदम्
यः रचयति चरित्र जनानाम्
गुरू अस्ति अस्य पदस्य नाम
सर्वेषाम् गुरूणाम् मम शतं शत प्रणामः||

— AKSHITHA, *6A*

# सुभाषितानि

चन्दनम् शीतलम् लोके चंदनादपि चंद्रमाः |
चन्द्र चन्दनयोः मध्ये शीतला साधुसङ्गतिः ॥
समानी व आकूतिः समाना हृदयानि वः |
समानमस्तु वो मनो यथा वः सुसहासति ॥

यथा वः सुसहा असति ॥
कर्तव्यमाचरम् कामम् कर्तव्यमनाचरम् |
तिष्ठति प्राकृताचारो य सः आर्य इतिः ॥
परोऽपि हितवान् बन्धुः बन्धुरप्यहितः परः।
अहितः देहजो व्याधिः हितमारण्यमौषधम् ॥
परस्परविरोधे तु वयम् पञ्चश्च ते शतम् ।
परैस्तु विग्रहे प्राप्ते वयम् पञ्चाधिकम् शतम् ॥



— LASYA BELLAM, *7E*

# मम परिवारः

एषः मम परिवारः अस्ति | अस्मिन् परिवारे सप्त सदस्याः सन्ति | सर्वे स्नेहेन वसन्ति | मम पितामहः प्रतिदिनं समाचारपत्रं पठति पितामही च प्रतिदिनं देवालयं गच्छति | मम जनकः एकस्मिन् कार्यालये लिपिकपदे कार्यरतः अस्ति | मम माता एका गृहिणी अस्ति | सा अस्मभ्यं सुस्वादुः भोजनं पचति | सा प्रातः काले सर्वेभ्यः उष्णं चाय पेयं प्रातराशं च अपि ददाति | सा गृहस्य सर्वाणि कार्याणि समयेन करोति | यदा -कदा सा माम् अपि पाठयति | मम अनुजः मन्दं मन्दं हसति | मम नाम आलोकः अस्ति | अहं षष्ट्म्यां कक्षायां पठामि | मह्यम् क्रिकेटक्रीडा अतीवं रोचते | मम अनुजा शीला तृतीयायां कक्षायां पठति | सा सर्वेषां प्रिया अस्ति | वयम् अवकाशेषु भ्रमणाय अपि गच्छामः | अयं परिवारः अस्मान् सद्व्यवहारम् अपि शिक्षयति | मम परिवारः एकः शोभनः परिवारः अस्ति |

— LAKSHMI B N, *6C*